[illegible] श्रीमदाचार्यचरणा [illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]

जना नितरां विस्मयन्ते तत्र तत्र भागेषु मदेशान्तरेषु सारानेर रणार्थं कृतानि व्याख्यानानि विशेषस्य विद्वांसि पाठाः पर्व नि यमापनते एव नानाविधानि स्तोत्राणि पत्र ... इत्य च मद्भनुर दिषु भाष्यादिक विधाय विद्वज्जना समृहीता श्रीमद्भागवतादिषु च व्याख्या विधाय भावुको जनोऽनुगृहीत बाधया ? इह जगत तले यद्यपि विद्वांसो निरलास्तथापि तदपेक्षया भगवद्भक्ता अनि रलतमा एव तेषामर्थे श्रीमदाचार्यचरणैः सुबोधिनीटीकाऽतिमुला कृतेत्यत्र न संशय प्रसगत स्थाने स्थान वादिनिराकरणमपि कृतमिति ज्ञेयम् अस्तु प्रकृतमनुसराम

(२)

निरूपिता श्रीमदाचार्यचरणानां प्रथनिमिति सप्रति तत्र्गहि तस्य पुष्टिमार्गस्य तत्त्वानि निरूपयामि यद्यपि केवल पुस्तकाभ्याम लब्धज्ञानलेशोऽसेवितपरमपूज्यगुरुचरणारविन्दो माद्दशो जन्तु क, क चागणितैर्भक्तशिरोमणिभि स्वीकृत पुष्टिमार्गस्तथापि केवल स्वरूपज्ञानार्थं यथाशक्ति प्रयते

(१) श्रीमदाचार्यवरप्रोक्तस्य पुष्टिमार्गस्यैव मुख्य तत्व यत् निष्कामत श्रीहरे सेवा यथा हि सतीष्वपि अन्यासु देवतासु पतिव्रतानां स्वपतिरेव शरण तथा भगवद्भक्तानां कृते सत्स्वप्यन्येषू पायेषु श्रीनाथ एव शरण तादृशभक्त्यविरोधेन हि सर्वत्र सासा रिकेषु वा वैदिकेषु वा कर्मसु प्रवृत्ति अत्यल्पमिन्मुक्त वस्तुतस्तु— यद्यत् श्रीहरे सेवाविरुद्ध स्यात्तत्सर्वमेवानिष्ट मत्वा हेयमिति ता- त्पर्यं इह जगतीतले यत्केचनानिष्टा वा सुखदायिनो वा प्रसगा स्युस्तत्र श्रीभगवत इच्छैव कारणमिति मत्वा सर्वथा श्रीहरिभक्ति-

धरणीया स च त्रैलोक्यनाथ श्रीनाथ सर्वमपि अनिष्टजात
मस्माना दूरीकरिष्यतीति विश्वासोऽपि करणीय एव इह भार
वर्षे यावधि ये खलु साधवो वा भगवद्भक्ता वा जातास्तेषामिद-
व तत्वमासीदन् सत्वपि लोकोद्धाररूपकार्यस्य बहुषूपायेषु ते
भगवन्तमेव शरणमन्वभवन् यथाहि लौकिका जना कस्यापि का-
र्यस्य सिद्धये नानोपायान् कुर्वाणा सिद्धिमलब्ध्वा विरमन्ति नि-
राशा वा व्यथाय प्रवर्तन्ते न तथा भगवच्छरणा साधव ते तु
सततमुपमाश्रितो भगवन्तमेव स्वकार्यसिद्धिकारण मन्वाना
फलस्याप्राप्तावपि अनुत्सुका न भवन्ति अतएव जगति ये ये
धर्मपथा वा ज्ञानमार्गा वा प्रचाल्यमाना दृश्यन्ते ते सर्वेऽपि ए
भिरेव साधुवैभक्तशिरोमणिभि प्रचारिता नैकोऽपि पशुवद्विप-
यप्राप्तौ लौकिकानैव स्वबुद्धिपरिकल्पितानुपाया प्रयुञ्जता लौकिकेन-
मानवेन प्रचालितो दृश्यते तस्मात्स्यकस्यापि कार्यस्य सिद्धौ स
वथा परमात्मैव कारणमिति मतिनसंशय प्रत्र कारणम् इय
मेव हि महात्मानस्य श्रीमद्वल्लभाचार्यचरणप्रकाशितस्यानादे पुष्टि
मार्गस्यास्ति तत्त्वम

द्वितीय तत्र यत् भगवच्छरणा सकलजगत्पालक पर
मात्मा श्रीकृष्ण सर्वदा सर्वस्य कल्याणायैव प्रवर्तते न खलु तस्य
कस्यापि कदापि वा कि प्रवृत्ति कस्यापि अभयस भवति ये
स्मिन्नपि कार्येऽपि वा कि प्रवृत्ति तस्मात्तस्मान्नापि स स्वस्याश्रयकृपयाऽन्य
स्य तस्य सर्वत्र स्यातुर्यायिनानुगृहीतास्यत्र नास्ति सदेह
गृहाण्व तदा स सकलप्राणिगणस्य कल्याणायानिश प्रयतमान
दृष्टाऽपि एव सकलप्राणिगणस्य कल्याणायैव कर्तव्या सा
सत्यसंकल्पस्य भगवत श्रीनाथस्य सततमाराधनैव कर्तव्या

सततमनुष्ठिता महते कल्याणाय भवति सा च न केवल कस्यापि कार्यस्य सिध्यै किंतु निष्कामतया यथाहि लौकिका पुरुषा किमपि फलं वाञ्छन्तो लौकिकमेव राजानं सेवन्ते तथा न परमात्मा सेवनीयः सेवितश्च सर्वज्ञः स निमनायमानो न भद्रं करिष्यति लौकिकश्च राजाऽज्ञः कथनं विना न जानाति, परन्तु सर्वज्ञ ईश्वरः सर्वं जानात्येव अतस्तत्र कस्यापि कार्यस्य सिध्यर्थं न सकल्पः करणीयः नापि तदनुरोधेन तदाराधना करणीया

३ तृतीयं तत्व—तस्मिन् परमात्मनि निर्विशेषं प्रेम विधेयमिति सामान्यतः सर्वेऽपि प्राणिगणा यथा स्वस्मिन् प्रेम कुर्वन्ति स्वसंबन्धिनि वा न तथाऽन्येषु किमत्र कारणं? ऋते भेदभावान्नान्यत् भेदभावो हि मानवस्य प्रीतिं परिच्छिन्ना करोति यत्र च भेदभावोऽपैति तत्र प्रीतिः स्वयमेव वर्धते नचायमभेदः काल्पनिकः? तस्य वास्तवत्वात् अतएव श्रीमदाचार्यचरणानां शुद्धाद्वैतवादोऽभिमत इति बोध्यम् अद्वैतवादे शुद्धाद्वैतवादे चायं विशेषो यत्प्रथमः ब्रह्मतत्वं सत्यं स्वीकुर्वाणो दृश्यस्यासत्यत्वं मायामयत्वं स्वीकरोति

श्रीमदाचार्यचरणास्तु वासुदेवः सर्वं इति श्रीमद्भगवद्गीतोक्तसिद्धान्तं स्वीकुर्वन्तो दृश्यस्य मायिकत्वं न स्वीकुर्वन्ति यथा तथास्तु श्रीमदाचार्यचरणानां प्रीतिनाशको भेदो नाभिप्रेतः पुष्टिमार्गे परमभागवतः न मे किमपि सर्वमिदं भगवत श्रीहरेरेव' इति मन्यमानः सर्वदा परमात्मसेवायां निमग्नो मोदते तेन श्रीहरेरेव सर्ववस्तुरूपत्वात्तस्य निरवकाशा प्रीतिः सुलभैव

४ चतुर्थं तत्वं तु यथा भगवान् सर्वथा भक्तानां सेव्यस्तथैव लब्धभगवदनुग्रहो गुरुरपि यथा हि बालको निसर्गतो बुद्धिमा

नापि गुरुसाहाय्य विना न पण्डितो भवति, नापि स्वध्येय लभते, तथैव मानव सस्कृतचित्तोऽपि गुरुसाहाय्य विना भगवत स्वरूप न ज्ञातु शक्नोति युक्त चैत्—अन्यथा सासारिके स्वल्पेऽपि कार्ये यदि योग्य मार्गदर्शक विना न वय तत्कार्य विधातु प्रभवामस्तदा दुर्ज्ञेयेऽनुभवैकगम्ये परमात्मस्वरूपे कुतो न गुरुसाहाय्यापेक्षा ? सोऽपि गुरु शिष्यविश्वाससहायस्त शिष्य बोधयितु शक्नोति नान्यथा यथा कश्चिदिभ्यो भवितुमिच्छन मूलद्रव्य विना न स्वेच्छा सफलयितु प्रभवति तथैव शिष्यविश्वासहीन सुमहानपि स गुरुस्त शिष्य न समुद्धर्तु तस्मादस्मिन पुष्टिमार्गे यथा हि भगवान् सर्वेषा भक्ताना निरतिशयप्रेमास्पद, तथैव तद्दर्शको गुरुरपीति बोधितम् तेनात्र गुरोर्निरतिशय माहात्म्यम्

५ पचम तु—श्रीहरेरव्यभिचारिणी भक्ति यथा हि स्वामिनिष्ठ सेवक स्वस्वामिनमेव सेवते नान्यमत्युत्तममपि अन्य स्वामिन तथैव भक्तेन सर्वदा भगवान हरिरेव सेव्य इयमेवाव्यभिचारिणी भक्तिर्नाम यथा पतिव्रता स्वपति सेवमाना न स्वप्नेऽपि अन्य पुरुष ध्यायति, अन्य ध्यायती चान्यथा पतिव्रताशीलात् प्रच्यवते तथैव भक्तोऽपि तस्मात्तत्र यथाशक्ति महता सावधानेन भक्तैरिय सर्वकामदुघा भक्तिकामधेनु सरक्षणीया

वाचका ? सर्वश्रेष्ठोऽय पुष्टिमार्गोऽस्मिनोत्तमोत्तमतत्त्वान्कृत कियद्दोषदर्शनात यथा रत्नाकरवर्णन कूपकेन कर्तव्य तथैव मया क्षुद्रमतिनाऽस्य पुष्टिमार्गस्य कानिचित्तत्त्वानि वर्णितानि विरमाम्यादधुना विरमामि यस्य चाधिक जिज्ञासा स्यात्तेन श्रीमदाचार्यचरणप्रणीता आकरग्रन्था एव दृष्टव्या

(३)

अस्मिन् भारते वर्षे चत्वारः खलु वैष्णवाः सन्ति ते च र
मानुजमाध्ववल्लभनिंबारकमतानुयायिनः मन्यन्ते कर्मकाण्डप्र
माण्यं स्वीकुर्वन्तोऽपि भक्तिमार्गमेव मानवाना श्रेयस्करं वन्नि
यद्यपीदं सर्वं सत्यं तथापि श्रीमन्महाप्रभुवल्लभाचार्यस्थापितस्य पु
ष्टिमार्गस्यान्येभ्यो महद्वैलक्षण्यं तथाहि श्रीरामानुजमतानुया
यिनः श्रीवैष्णवा विशिष्टाद्वैतवादिनो भेदं तात्त्विकमेव मन्यमाना
स्तादृशीं प्रीतिं परमात्मनि कर्तुं न प्रभवन्ति यादृशीं 'वासुदेव
सर्वं' इति मन्यमाना पुष्टिमार्गानुयायिनः कुर्युः माध्वाश्च सत्यमे
वात्यन्तिकद्वैतवादिनः तेषु च नाद्वैतस्य लेशोऽपि निम्बारकाश्च द्वै
ताद्वैतवादिनः इति शुद्धाद्वैतस्याभावात् निरतिशयप्रेम्णोऽवसरः ए
त्रिषु वैष्णवेषु ये च शाकरा अद्वैतवादिनस्ते तु 'अहं ब्रह्मास्मि
इति मन्यमाना उपास्योपासकभावमेव समूलमुच्छिन्दन्ति ते
सर्वथा भगवदनुग्रहशालिनोऽस्मात् पुष्टिमार्गान्नान्यः उत्तमोऽन्य
भक्तिमार्गः

किंच—रामानुजमतानुयायिनो भक्तिं मोक्षसाधनमाहुः तथै
माध्वादयोऽपि श्रीमद्वल्लभाचार्यानुयायिनस्तु भगवतः प्रसाद ए
भक्तेः फलमाहुः वस्तुतस्तु अभ्युपगमेनोक्तं परमार्थस्तु पुष्टिमा
भगवद्भक्तेः फलमेव नास्ति यथाहि सदपि सततं वर्तमानयो
श्वासोच्छ्वासयोर्जीवनं न फलं किंतु लाक्षणिक्या वृत्त्या तथोदीयते ए
पुष्टिमार्गानुयायिनो महाभागवतस्य भक्तेः फलं भगवत्प्रसाद इति
यो हि परमवैष्णवः किमपि फलमनपेक्षमाणः परमात्मानं श्रीह
सेवते तदुपरि भगवान् स्वयमेव कृपां करोति यथा वा स्वयमानस्य

चाऽभ्यमयमानस्य या याटरम्योपरि समाना मातु कृपा, मातृसंतोषार्थ स्मितविधान तु बाल्यस्य कर्तव्य, तथैव प्रकृतेऽपीति ज्ञेयम् तेन मार्गद्वैलक्षण्यमस्य पुष्टिमार्गस्यान्यभक्तिमार्गत इति संक्षेप

(४)

पाठका ! निरूपितमस्य पुष्टिमार्गस्यान्यभक्तिमार्गतो वैलक्षण्य सम्प्रति अस्यैव सेवनीयत्वे कारणानि उपाहरामि मानवस्य जात-मात्रस्य यस्मिन् कस्मिन्नपि तत्त्वे श्रद्धा भवत्येव ता च श्रद्धा क्रमेण दृढीभावमापन्नमाना पण्डिता जना धर्मशब्देन व्यपदिशन्ति तत्र प्रथम धर्मस्य स्वरूप प्रस्तावनोक्तरीत्या कर्ममयमेवासीत् यत प्रमाणीभूतेन वेदेन बोधित कर्म तत्तत्कर्मैव न तत्र फलजिज्ञासाया अवसर इति वस्तु तत्स्वरूपम् ततश्च विचारशीला मानवश्रेष्ठा यथायथाऽधिक विचारयामासुस्तथातथा केवलमध्यक्षसिद्धमपि श्रद्धापरपर्याया प्रामाण्यबुद्धिन कर्मपि चिर प्रवर्तयितु प्रभवति यथष्टसाधनत्वबुद्धि बालको हि लड्डुकभक्षण यथा झटिति प्रवर्तते नैव केवल मातुराज्ञापालने ततो मोक्षरूपसर्वेष्टसाधनत्वबाद समायया तस्य च कारण न कर्माचरण किन्तु ज्ञानमिति यदा सिद्धान्त प्राचलत्तदा कर्मकाण्ड तदुक्तानि कर्माणि च शिथिलान्य भवन् यत न मोक्षेच्छया प्रवर्तित ज्ञानकाण्ड प्रबलमभूत्तदा प्रायाऽस्यायमा पुण्या अस्मा समाजस्थितिमदूषयन न तं कर्तव्य-बुद्धया स्ववर्णाश्रमाणि समाचरन तेन समाज पर दुर्बलो दुरवस्थोऽभवत् एतस्य सर्वस्यानर्थजातस्य दूरीकरणाय भक्तिमार्ग श्रेष्ठ साधुभि प्रचालित अस्मिन भक्तिमार्ग मोक्षरूपेष्टसाधनत्वमपि विहाय कर्तव्यबुद्धया क्रियमाणा भगवत सेवाऽपि तथाचोभयोरपि कर्मकाण्डज्ञानकाण्डयो सारभूतोऽयमिति स्पष्टमेवोक्त भवति अस्तु

वाचका ! उपरितननिरूपणेन भवद्भिरवगतमेव भवेत् भक्ति मार्गस्य परमं प्रयोजनं मोक्षरूपात्यन्तिकसुखपरिदानपूर्वकं समाज सुव्यवस्थाविधानं तत्र मोक्षस्य व्यक्तिसुखातिशयरूपत्वात् कस्याऽपि कृपयैव सम्पादनीयो भवेत् तथाच योऽस्य जगतः पालयिता श्रीहरिस्तस्य कृपयैव स सम्पाद्यो भवेत् सज्जनानां स्वभावोऽयत्ते हीनमपि मानवं स्वसमानगुणकं विदधाति यत्नेव तदा कैवल्या परमात्मशरणीकरणे समाजव्यवस्था च सदा सदाचरणतत्परैरेव भवति सदाचरणं च यद्यपि सर्वत्र परमात्मसत्तां मानयन्त साधवोऽनुतिष्ठन्ति तथापि तत्तादृशं सदाचरणानुष्ठानं न मर्यादया सर्वं परमात्मरूपं भावयन्तः पुष्टिमार्गानुयायिनोऽनुतिष्ठेयुः तस्मात्सर्वत्र परमात्माऽस्तीति भावयन्तोऽन्यभक्तेभ्यः पुष्टिमार्गानुयायिनो निःसंशयं सदाचरणपरा इति वक्तव्यमेव अयमत्र भावः—विषयमना स्वीकृयोदितायां पापभावनायां परमात्मनिरीक्षणमिया तस्यास्तस्यामात्मभावनायां अनुदय एव श्रेयानिति तात्म्यभावनाया अनुदये च कारणं विषयाणां पृथक्सत्तास्वीकारभाव था कि परकानां का नामभावयन् परमात्मस्वरूपमेव न मन्यत स ना वी य कथं पापवासनावान् स्यात् तस्माद्विषयगत पृथक् स्वीकृत तत्र तत्र परमात्मसत्ता स्वीकुर्वन्तोऽन्यभक्तिमार्गीयेभ्यः सर्वथा मतिमान्य इति यत्न पृथक् विषयसत्ता च स्वप्नेऽपि पापवासनानाशं समूलं पातयन् श्रीमदाचार्यचरणैः मार्गितोऽयं पुष्टिमार्गः कस्य सन्तापाय न भवेत् ?

किञ्च—या हि सर्वत्र परमात्मदर्शनमात्रं स्वात्मस्वैवम् पश्यति तत्र परात्पराधिरिति न मन्यते प्रभृत्यपि पापवासना तस्यो

निवर्तन्त इति सर्वेषामनुभवसिद्धमेव परन्तु स्वस्य स्वोपास्यदैवतस्या
नादरणीयता वा कोपनीयता वा निवृत्तावपि चित्तवृत्तिर्न स्वोपास्यदैवते
प्रीतिं समुत्पादयितुं शक्नोति प्रसिद्धं चैतल्लोके यत् राज्ञः सकाशात्
साधारणा जना बिभ्यतीत्यत्र कारणं न तेषां राज्ञि विद्यमानोऽ-
नुरागः किंतु दण्डभयं अपकुर्वतोऽस्मान् क्रूरदण्डो राजा दण्डयेदिति
भीताः सांसारिका जना न पापमाचरन्ति एवंस्थितेऽनुरागस्या
भावात् एव न पतिकोपभिया पतिं सेवमाना पत्नी तादृशमनुरागं
न प्राप्नोति यादृशं सैव भीतिरहिता तस्मात् स्वस्य पृथक् सत्त्व
मीडुपाद्भिरन्यैरामानुजमुनिप्रभृतिभिः स्थापितेभ्यो भक्तिमार्गेभ्यः
सर्वत्र 'वासुदेवः सर्वं' इतिवादी सर्वं प्रेममयं जगत्पश्यतोऽयं
पुष्टिमार्ग एव नितरां मानवानां कल्याणकरः।

अपि च—मानवा इहलोके केवलं सुखलाभायैव प्रयतन्ते न
तु दुःखलाभायेति सर्वेषां सम्मतं तत्र जीवः खलु विषयलाभत
आत्मानं सुखिनं मन्यते तथापि दुःखचरः यदि विषयत्यागस्तस्मै
रोचयिष्यते तदा स स्वसुखनाशमुत्प्रेक्षमाणो न सन्तोषेण तमनु
तिष्ठति तस्मात्तेषां विषयत्यागमनङ्गीकृत्य यदि परमात्मस्वरूप एवमेव
तेषामुद्देश्यं तदा सोऽवश्यं नित्यसुखी भवति श्रीमदाचार्यचरण
स्थापितोऽयं पुष्टिमार्गो ननु भक्तिमार्गेतरविषयत्यागभूतः नापि अद्वैत
मार्ग इव विषयान् मिथ्या वदति किन्तु य एव जगति विषया
दृश्यन्ते ते नाशमापादयितव्या नेहरूपाः किन्तु वासुदेवः सर्वमिति
श्रीमद्गुरुद्वारा लब्धया सर्वं भगवत्स्वरूपाः पश्यति ततोऽस्मिन्नत्यन्तसुखस्य
नित्यस्य सम्भवः सर्वथा । अनितराऽयं भक्तिमार्गः माहात्म्यं
जन्तुश्च न वक्तुं वर्णयितुं शक्नुयात् तथापि स्वल्पं माहात्म्यं कृत
अधुना विस्तरभयात्परित्यज्यते



१२ वैकुण्ठप्राप्ति ।

१ काशीविजय ।
२ भागवतरीत्या सन्यासग्रह ।
३ परमहंसदीक्षया वृत्ति
४ भागीरथीप्रवाहप्रवेश

(१)

प्रियबान्धवा ! निरूपित खलु पुष्टिमार्गस्य महत्त्व साम्प्रत श्रीमदाचार्यचरणाना वैकुण्ठप्राप्ति वर्णयामि यद्यपीद प्रकरण श्रीमदाचार्यचरितस्यान्तिम, तथापि नित्यसत्स्वरूपाणा भगवद्भक्ताना नान्तो नादिरिति न खल्वस्यावसर अस्तु प्रकृतमनुसराम श्रीमदाचार्यचरणा पृथ्वीपरिक्रमया श्रीगोवर्धनधारिण श्रीगिरिराजे स्थापयित्वा तथा सर्वेषा परमवैष्णवाना स्वानि समनोरथा प्रथनिर्मिति विधाय च विदुषा स्वानि अभिमतग्रन्थानभ्यस्तापु तता महता मनोरथेन च स्वशिष्यगण सम भगवत श्रीगोवर्धनधारिण श्रीकृष्णस्य सन्निधि विधाय च स्वय वाराणसीमायनु

तत्र च निवसन्त श्रीमदाचार्यचरणा स्वमातृपादानामाज्ञया विंशतसहस्रब्राह्मणभोजनमकल्पयन्त तद्वैभवाय च तत्रापि तत्र समाराधयन् श्रेष्ठी पुरुषोत्तमनामाऽपि तत्रानुकूलो बभूव

तदानीं सकलभारतवर्षप्रसृत श्रीमदाचार्यचरणानां यश प्रकरमालो
कयापूर्वविपास्मरणिमण्डिता तैषां मयरीर्ति सागारन्य मात्सर्यदोष
दूषिता केचन पण्डितमन्या 'काशीविजयध्वजोऽयं' इति मिथ्यैव
घोषयन्त स्वसदृशानन्यान् बोधयामासु ते सर्वेऽपि शुष्मतय
सगोपमागत्य विवदितुमारभन्त श्रीमदाचार्यचरणाश्च तैः सम विव
दितु शक्तानपि स्वशिष्यगणाभिवार्य स्वयमेव तान् बोधयितुमुद्यता
अभवन् श्रीमदाचार्यचरणानेव वादोद्यतानवलोक्य भीतास्ते सक-
पण्डिता सहसा सभातो गत्वा पाण्डित्यभास्वाग्नि उपेन्द्रगुरुत्यान
यतीन् वादविधानार्थं प्रार्थयामासु ते च पण्डिता अपि मानवस्य
भावमत्यन्तमत्यायना स्वीकृत्य वादार्थं निर्णीते स्थले उपतस्थिरे
श्रीमदाचार्यचरणाश्च स्वशिष्यस्य श्रेष्ठिन पुरुषोत्तमदासस्य पञ्चगङ्गा-
तीरवर्तिनि निर्माणे महाप्रासादेऽवसन ते च वादार्थं समागतास्ता-
नुपेन्द्रप्रभृतीन् यतीन् सादरं सत्कृत्य प्रधान प्रश्नादिनान ते च
वादार्थमागता अपि प्रतिपक्षिणस्तामाचार्यपादानां दिव्यतेज शालिनीं
मूर्तिं विलोक्य विघ्ना अपमन्य यंच जिज्ञासानुद्धता याश्चित्प्रश्ना
न्चक्रु साक्षात्स्विदेवावतारभूता श्रीमदाचार्यचरणास्तान् प्रश्नांस्तथा-
व्याचक्रुर्यथा सर्वोऽपि तत्रोपस्थितो लोकस्तद्यथार्थश्रवणं निशम्य
चित्रगत इव बभूव वादिगणमुख्य उपेन्द्रयतिश्च विमूढमति
किमपि प्रतिवक्तुमपारयन् सत्वरमुत्थाय परमपवित्र विविधभक्तगण-
शिराधृतधूलिक श्रीमदाचार्यचरणानां चरणसरोज स्वहस्तयुगलेन
धृतवान् तं च शरणागतमवलोक्य पर हर्ष पुष्टिमार्गानुयायिनो
वैष्णवा आनन्दन भगवन्नामविजयघोष चक्रु श्रीमदाचार्याश्च
परमोदारहृदयकमलाम्नातनिषिध्य जगदु सस्नेहोऽयं ससार स्तु

तत्रभवत श्रीहरेरेव अत्र च निवसन्त प्राणिगणा सर्वेऽपि तर्स्मै
वानुचरा तद्यदि कश्चन मोहात्सदपि तदनुचरत्व नाङ्गीकुर्यात
सुखेन स बोधनीय बोधितो यदि तत्प्रतिपद्यते तदा परमे
अन्यथा तु तस्यैव महती हानि तथाचान्येषु भगवदनुचर
स्वीकुर्वत्सु अस्वीकुर्वत्सु वा भगवद्भक्तस्य न कोपि लाभो हानिर्वा
व्यवसति किमर्थं रागद्वेषौ ? किमर्थं च तद्योतनाय विजयघोषणा
अनेन क्रमणा भगवद्भक्ता रागद्वेषशालिन इतरजनवत्तिरस्कारा
भवन्ति तस्माद्भगवद्भक्तेन सवदा महता सावधानेन वर्तनीय
यस्मिन् कस्मिन्नपि काले रागद्वेषौ न विधेयौ यथा हि सूर्ये
जन्माधैरवीक्षितोऽपि सर्व जगत्प्रकाशयति तथा तेन सर्वे जन
बोधनीया न च बोध सासारिका ना स्वीकुर्वन्तु मा वा अन
मार्गेण यतमानस्य भगवद्भक्तस्य कल्याण जायते त्य भाग
हानि मोऽन्यथामपि कल्याण कतु प्रभवति इति निशम्य
चेमाममृतमयीं श्रीमदाचार्यचरणाना वाणीं तत्रस्था सर्वेऽपि आ
पर ममतुष्यन ततश्च सर्वे वाणिकै पूजितास्ते श्रीमदाचार्यचरणा
स्वसकल्प पूरयित्वा सर्वान ब्राह्मणान समतोषयन

(२)

एव कतिपयदिवसान् [illegible] श्रीमदाचार्यचरणा
स्वावतार समाप्तिं चिकीर्षुरिव सर्वानि [illegible] यथा हि भगवतोऽखिलै
मन्दिमान समाप्तिं कुर्वत्सु अवतीर्णा यथाऽऽलि सक्षयमुकुटि
यद्यदि अस्य भक्तिमार्गस्य क्रमशः [illegible] सुखस्त
तत्तु तस्मिन सर्व आयास्यति [illegible] भगवतो भक्तिरेव
[illegible] दर्शित यथा च भगवद्भक्तिमार्गस्य आश्रमाः नाम

दन्ति तथा न चरम संन्यासाश्रम तत्र तु शिखायज्ञोपवीतादिक
विहाय केवल तूष्णीमवस्थान विधीयते तस्मादिह न च म सन्या-
साश्रम एव समनुसर्तुयितु शक्य तस्य सकलाश्रमसमतत्वात्
तस्मात्सोऽपि भक्तिमार्गाविरोध्येव करणीय ममाऽपि सर्व गृहस्था-
श्रमकर्म समाप्तमेव पुत्रौ च स्वगार्हस्थ्यभूतौ भगवत्सेवा करिष्यत
एव सम्प्रत्यहमेव संन्यासाश्रम स्वीकृत्य तत्रापि भगवतो भक्ति-
विशेष कृत्वा स्थापयिष्यामि एष संन्यासाश्रमोऽपि भक्त्यविरोधीति

विचिन्त्य चैव श्रीमदाचार्यचरणा संन्यासाश्रम प्रवेष्टु मतिमकु-
र्वन अथान्तरे भगवान भवद्भिर्लीलायामागन्तव्यमिति श्रीमदाचा
र्यचरणानाम्नापयामास ताभाज्ञा गृहीत्वा भूतलवसति स्वस्य स्वल्पा
मन्वाना शीघ्रमेव संन्यासाश्रमग्रहणाय निरचिन्वन् तत सर्वानपि
शिष्यगणानाहूय भगवदाराधने स्वस्य ज्येष्ठ पुत्र श्रीगोपीनाथ नियुज्य
तदाज्ञया धनतार्थ सर्वानपि स्वोपदेशमार्गीनादिश्य तमपि श्रीनाथ-
सेवाविधानाथभारग्रहण कथयित्वा संन्यासाश्रमप्रवेशाय स्वपत्न्यनुज्ञा
मयाचन्त अवश्य-भार्ये ! इदानीमहमाश्रमान्तर प्रवेष्टुकामोऽस्मि
गृहस्थाश्रममनुष्ठाय सतान च समपिन्त तदिदानीं मामनुज्ञातुमर्हसि
त्व हि जानास्येव भगवत्सेवा विना न मे किंचिन्म्यद्रोचत इति

तदिद तेषा श्रीमदाचार्यचरणाना निश्चयबोधक वाक्य निशम्य
दुःखातुराऽपि सा सती परमानन्दन संन्यासाश्रमप्रवेशायानुमति
प्रत्यायामास स्वभार्याया अनुमति वीक्ष्य संतुष्टा श्रीमदाचार्यच-
रणा भागवतरीत्या सन्यासाश्रम स्वीचक्रु

बाधका ! सन्यासाश्रमस्य सामान्यत स्वरूप विषयत्यागरूप
गृहस्थ पुत्रभार्यादिपरिमितपरिवारस्तस्यैव पालने सतत प्रयतमानो

(३)

एव संन्यासाश्रम गृहीत्वा श्रीमच्चैतन्यचरणा पूर्वाह्णे नूतन नाम धारयन्तो भागवतसन्न्यासिनां सर्वं दैनिक विधिं समापयन्त एव पुनः षड् दिनानि गता ततो वानप्रस्थाश्रम गृहीत्वा तत्रापि पर्याप्त समयमधिगत्य गृहेषु भिक्षां याचन्तोऽन्य दिनानि यापयामासु ततो हंसाश्रम प्रविश्य क्रमेण पारमहंस्याश्रमाग तु समाविष्टा मार्गे च सामान्य परमभागवतेभ्यो अनितथामलगुणगौरवमदल्प भिक्षित्वा मधुकरवत् नियत भूतेभ्यो विभज्य दया भावतारणार्थमिवान्यन्मिथ भ्रमयामासु, अनिश च समागतान् भक्तजनान् भागवतकथा श्रावयन्त समय समये गीयतान् भगवद्गुणगान कारयन्तो महताऽऽनन्देन वासी प्राय दशमाप्यहे सितासितेऽपि शोभारयेषामन्या अभवन्

यावता ' यद्यपि संन्यासाश्रम एव चतुर्थ आश्रम स चैक-मेधापि सर्वाश्रमाणामाधिपत्यधाराधर्मिमेऽयात् तदाश्रमभेदेन कस्मि-श्चि यथा हंसपरमहंसप्रभृतय परंतावता तथा सद्भिर्नास्य गृह-त्यागकस्य सर्वत्र नामा पदरूपेणावस्थानात् तत्र च हंसाश्रमधारिणा श्रीमच्चैतन्यचरणाना स्नानार्थं सर्वेऽपि तत्रान्यवासिन पुष्पमाला धारिणो भक्तगणा आगच्छन् तेन प्रथमत एव विपुलजन समन्वितापि सा वाराणसी अगणितजनमालिन्य वैनाभवन्-सर्वर्ऽपि वर्णया नरेन्द्रिय भगवन्नामघोष कुर्वन्त आचार्याणाममित भक्ता आसन् ' यद्यपि बहव खलु काषायवस्त्रधारिण सन्न्या सिना दृश्यन्ते परंतु ते केवल साहस एव तथा न पुनरन्तरतः यत्र हि लाभो न दृश्यते यत्र च पुत्रकलत्रादिषु वर्तमानो मोहो न विधूयते तदा केवलं परवचनस्पर्शे काषायवस्त्रे कि भविष्यति ? केवलं शिखासूत्रस्य त्यागेन पातकमेव लभ्यते इति मन्तव्य अस्तु,

बह

अथ हंसाश्रमं प्रविश्याष्टदिनपर्यन्तं स्थितान् श्रीमदाचार्यचरणा
न्यागतान्समाधानवेला समीपमागतामवलोक्य परमसंतोषेण परम
हंसाश्रममन्तिमं श्रीकृष्णनामानं मयापि प्रभुम्यां स्वशिष्यान्दू
तान् महता प्रेम्णा श्रीनाथभक्तिमुपदिदिशु जगदुश्च—यत्'
श्रीभगवता गोवर्धनाधिपेन नियोगतोऽस्माभिरेव महीलायां समा
गिणी भविष्यामि अस्मिन् भूतलेऽपि तस्यैवाज्ञाऽस्मदीयां भक्ति
प्रमार्गानुसरण अत समाचे [illegible] समये [illegible]
[illegible] मुग्रहाणी हरिभक्तिरेव [illegible] मातेव [illegible]
[illegible] पार [illegible] [illegible]
[illegible] किंतु [illegible] [illegible] तथा [illegible],
[illegible] [illegible] कारणं [illegible]
[illegible] [illegible] [illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]

न्ति अधिकारं मायेन स्तु मुमुक्षुगोष्ठीभिः सावधा
नतया सदैव स्मर्तव्य मायावादिवन्दान च वैष्णव परमात्म
दर्शनानि स्म भूयोभूय स्मरेव तत् सावधाना तुया याव
दिव परमात्मभक्ति मुक्त परमात्मानुमहानन्द लाभ न मनुत माद
शा सावधान श्रीहरि भूयोभूयो मायावादिकल्याणाय प्रेषयेदृश
स्यापि परमात्मीयमिम पुष्टिमार्ग परिपालयत भगवन्त श्रीगोवर्धन
धारि स्वकल्याणकारिलमालस्य सेवध्व अय हि साक्षात् कल्प
द्रुम इव स्वभक्तमनोरथान पूरयितुमितावतीर्ण इति च सर्वेर
न्दधमय इत ऊर्ध्वमह मौन धारयिष्यामि तदिदानीमह परम
वर्गान-न्यदेव श्रीनाथ सेवमाना पुष्टिमार्गानुयायिना सतत
कल्याणमेव भवन्ति इति

एव वाक्यामृततुल्य श्रीमदाचार्यपादानामुपदेश निशम्य सर्वेऽपि
शिष्या सावधाना परमसन्तोषाविता बभूवु अचिरादेव परम
मार्गीया श्रीमदाचार्यचरणा सर्वाश्रमेष्वन्त्याश्रम परम
हंसरूप स्वीकृत्य मौनमवलम्ब्य तस्थु


(४)

अथ परमहंसाश्रमशीला पंचक दिनानि स्वीकृत्य सप्तदिनपर्यन्त
श्रीमदाचार्यचरणा परमपवित्राया विष्णुपदशालीर निवसन्तो भगव
ल्लीलाश्रवणसमय महतौत्सुक्यनापालयन यथा च परमपतिव्रता
चिर प्रतिप्रस्थानरहिता ग्रामादागच्छन्त स्वपतिमौत्सुक्यन ध्यायति
यथा वा बालो वत्स स्वमातुर्वनान्तरादागमनपरा प्रतिपालयति
तथैव श्रीमदाचार्यचरणा अपि भगवतो वैकुण्ठे लीलादर्शनार्थं पर
मौत्सुक्यन यथचिद्यतन्त तत शीघ्रमेव समादीत्युर

ताब्दीयापाढशुक्लपक्षस्य द्वितीयो दिवस समायय़ौ पुष्यनक्षत्रान्वित त समयमनुकूल मन्वाना श्रीमदाचार्यचरणा प्रातरारभ्य केवल परमात्मनाम घोषयन्त सर्वं वासुदेवस्वरूप पश्यन्त परमानन्देन ववर्तिरे सव शिष्याश्च प्रभातमारभ्य तत्रैव न्यवसन्

अथ भगवान् सहस्ररश्मि श्रीमदाचार्यचरणेभ्य श्रीवैकुण्ठमार्ग प्रदर्शयितुमिव स्वामिभक्तसेवक इव वियन्मध्यमारुरोह दिनमणौ वियन्मध्यमारूढे सति दिव्या दुन्दुभय स्वर्गेऽनदन्त तान् दुन्दुभिनादानाकर्ण्य सर्वे दवास्तथा देवपय श्रीमदाचार्यचरणाना सत्काराय वैकुण्ठमार्गमलचक्रु सवा अप्सरस सम गन्धर्वकिन्नरैरनृत्यन् देवसेवकाश्च मन्दारपुष्पाणि भुवि चिक्षिपु एव सर्व सन्नाह वीक्ष्य श्रीमदाचार्यचरणा श्रीगोवर्धनधारिणस्तृतीयाज्ञा स्वीकृत्योत्थिता कौपीनमात्रवसना सानन्द प्रणिपतत सर्वान् शिष्यगणाविलोक्य परमपवित्र भागीरथीजल प्राविशन्

अत्रान्तरे श्रीगोपीनाथप्रभृतय सव सबन्धिन आययु तानपि केवल प्रत्य पाषाणखण्ड सवसारभूत श्लोकत्रय लिखित्वा भगवतो नाम घोषयन्तो ज्वालापुञ्जरूपेण वैकुण्ठमागच्छन तदानीं वियति विमानसहतिरनिनिनिदाऽभवन् अविरत दिव्यपुष्पवृष्टिरपि सर्वे वैष्णवाश्च स्वहातिशयन श्रीमदाचार्यचरणवियोगविह्वला अपि तत्कृतमुपदेश तथा कर्तव्य च सम्यक स्मरन्तो भगवद्भक्तिविधाने कृत निश्चया भगवद्दोलादिक विधाय सवान सतोषयामासु



१३ सिंहावलोकनम्

१ गुर्जराणामुद्धार
२ प्राय मनमनातनधर्मानुयायिषु कृपा
३ मत्स्युत्कर्ष
४ परस्परद्वेषनिराम

ममाप्तकल्पमेव श्रीमदाचार्यचरणाना पावन चरित अधुना श्रीमदाचार्यचरणैरस्मिन् भूतलेऽवतीय किमनुष्ठित तत्सिंहावलोकन न्यायेन सक्षेपतोऽनुवर्णयामि

(१)

श्रीमदाचार्यचरणैरनुष्ठितेषु मर्वेषु कार्येषु प्रथम कार्य गुजराणा मुद्धार इत्यह मन्ये पाठका ! अस्य सम्यक् विज्ञानार्थं प्रथम गुजरवृत्त सविस्तर निरूपयामि

एते सर्वेऽपि गुजरदेशनिवासिन आर्याणा वंशजा एव आर्या णामागमनात्पूर्व ये गन्धर्वजातीया अवसन ते च सप्रति तत्र न सन्त्येव सन्तोऽपि चाऽत्यल्पा एव यदा च सर्वे तद्देशवासिन आर्यवशजा वर्मकाण्डोक्तरीत्या कर्माणि समाचरन्तो यज्ञान् व्यधु स्तदा तत्र हूयमानाना पशूना सघात वीक्ष्य केषाचिन्मनसि दया पदमाधौ अत्रान्तरे मगधदेशे बुद्धो नाम शुद्धोदनपुत्र कश्चन परमतपस्वी विद्वान प्रादुरभवत् स च यज्ञेषु क्रियमाणा

नगन्नालन्वम्य चेतनतत्त्वस्याक्षेभ्यो जनेभ्यो बोधनं तस्य बोधनार्थे-
मेमे मन्ऽपि यत्नान्यो विषय एवस्थित यदि तस्यैवोच्छेदो भवे-
न्नून सनातनधर्म एवोच्छिन्नो भवेत् बौद्धैस्तु क्षणभङ्गवादिभिर्यज्ञादि-
हिंसानिषेधेन न सनातनधर्मविरोध कृत, किन्तु सर्वस्य तथा तत्त्वा-
त्मन्याऽपि क्षणिकत्वस्वीकारेण तस्मात् सर्वत्र श्रीहरेर्वेदवाल्यानि
वेधाय भक्तिमार्गप्रसारयद्भिरस्मि स्वतन्त्रेच्छ चेतन तत्त्वमिति घोष-
यद्भि श्रीमदाचार्यचरणै कृतकस्यापि सनातनधर्मस्य महदुपकृतम

(३)


श्रीमदाचार्याणा कृताय महाकार्ये भक्त्युत्कर्ष श्रीमदाचार्यचर-
णाना प्रादुर्भावात् पूर्वमपि भक्तिरासीत्, परं च साऽङ्गत्वेन न तु
मुख्यतया रामानुजादयो हि मोक्षसाधनत्वेन भक्ति स्वीकुर्वन्ति स्म
अद्वैतवादिनोऽपि तथैव वमनसोऽन्यस्तु केवल धर्मांगत्वेन श्रीम-
दाचार्यचरणा परमामभक्तिमेव परम फलमुक्त्वा मोक्ष वैकुण्ठप्राप्ति-
लक्षण गौण फलमाहु नैव यत्रापि अयनाचार्येणोक्त तस्मादाधु-
निको दृश्यमान सर्वोऽपि भक्त्युत्कर्ष आचार्यचरणैरेव कृत इति
नि सशय वदामि

(४)

वाचका ! पूर्वोक्तरीत्या श्रीमदाचार्यचरणैर्योऽय भक्तिमार्ग
स्थापितस्तस्मिन्नपि प्रयोजन यत्तन्न चतुर्णामपि वर्णाना परस्परद्वयो
नामशेषो भूरिति तथाहि यत्र तत्त्विमे चत्वारो वर्णा स्वस्वविहि
तकार्याणि कुर्वन्त आसन्त तत्र सर्वेऽपि सासारिकस्य सुखस्य परा
काष्ठा प्रापुरिति सर्वेऽपि जना जानन्ति साम्प्रतमेभयस्य परा
काष्ठामारूढा पाश्चात्यदेशा यदा यवलमधयमाणनामान

स्वदाऽय देश सर्वमान्य आसीदिति मान्यनीन अथ गच्छति काले ते मन्त्रऽपि त्वागे वणा स्वोत्कर्षस्य कारण परस्परमन विस्मरन्त परस्परमद्विषु तेन च द्वपेण दुस्त्यानमानिमे मन्मर्थ्यः पराजित्य वन्दिनभ्रम् ते च राजनीतिचतुरा परस्परद्वेष मध्यस्थ ज्वालयन्त सुखेन राज्यान्यन्यासु तदित्थमनयचातमात्मीय मत पुरुपधौरेयास्तत्कारण नाशयितु पर प्रायतन्त, परन्तु यावत्कालं लौकिके इव पारमार्थिकेऽपि कर्मणि न चतुर्णामपि वर्णाना समाना महत्ता स्वीचकुर्मानत्मामग्र्येण न यशोऽलभन्त एतत्समस्तमालोच्य साधुवरा वैदिक धर्मकाण्डोक्त कर्माचरण प्रतिनिधत्तस्य स्थाने परमात्मभक्तिमेव निवेशयामासु श्रीमदाचार्यचरणैश्च सर्वथा तुलसीमाला निर्तीर्य श्रीहरेभक्तिरेवोपदिष्टा तेन शान्तपरस्परद्वेषा भारतवासिन ऐक्यमत्येन वर्तमाना यवनान् परमवलानपि अजयन रजपूतक्षत्रियाश्चानेनैव कारणेन स्वपार्थिवमरक्षन मन्त्रप्यपि तैस्तै रामानुजप्रभृतिभिराचार्यवरै स्थापितेभ्य सम्प्रदायेभ्य एव पुष्टिमार्ग पर परस्परद्वेष शमयितु प्रायतत तेनायमेव प्राधान्येन भारतभूमौ विख्यात इति ज्ञेयम्

प्रियबान्धवा ! यै खलु स्वीय पवित्रमायुर्दीनाना भारतवासिना जनानामुद्धाराय यापित यैश्च सर्वत्र लौकिकालौकिकोभयसुखप्रदा भक्ति सर्वत्र प्रसारिता अगणितानि दु खानि विपह्य पृथ्वीपर्यटनानि विधाय समग्रा लोकस्थिति प्रत्यक्षीकृता, तेषा खलु जगद्वन्द्याना श्रीमहाप्रभुवल्लभाचार्याणा कार्यराशेरल्पमपि गणयितु क शक्नुयात् ! तस्मात् कृतमिद चापल विनयेन तच्चरणयो समर्पयित्वा प्रकृतमनुसरामि



१९ संक्षेपणाग्रिमवृत्तसंग्रह

१ श्रीविट्ठलेश्वरचरितम्
२ श्रीनाथस्य नाथद्वारागमनम्
३ सुवर्णछत्ररचना
४ अद्यपर्यन्त तद्वृत्तम्

(१)

एव सर्वत्रापि भारते परममान्य सनातनधर्मरक्षक भक्तिमार्ग प्रचारक वैकुण्ठगतेषु तत्रभवत्सु सकललोकवन्दनीयचरणारविन्देषु श्रीमहाप्रभुवल्लभाचार्यचरणेषु सर्वेऽपि तदीया अनुयायिन पर शोकमग्ना अभवन तथापि तत्परिष्टस्य पुष्टिमार्गस्य सेवन तथा वर्धनमत्र स्वकर्तव्य मन्यमाना विवकाग्रधूनशोकवेगा सर्वे वैष्णवा श्रीमदाचार्याणा ज्येष्ठ पुत्र श्रीगोपीनाथसज्ञक पुरस्कृत्य पुष्टिमार्ग धौरन्धर्य चक्र तदपि गोपीनाथाचार्या सर्वथा पुष्टिमार्गानुया यिनामाग्रह वीक्ष्य कथमपि स्वपितृचरणवियोगदु ख विस्मृत्य तत्स्य मार्गस्य सत्यामानुरोधेन न्वधु

तनन्त्र त गोपीनाथाचार्या कतिपयदिनैर्भगवत श्रीनाथस्य सेवार्थ श्रीगिरिराजपर्वतोपरि मन्दिर निर्माय च श्रीनाथ तत्स्य सेवाभाण्डानि मर्वाण्यपि रत्नमयानि अकुर्वन गच्छत्सु त्रिषु वर्षेषु एकदा गोपीनाथाचार्या स्व पुत्रेण पुरुषोत्तमेन सम श्रीनाथ

सेवार्थं गिरिराजमागत्य न्यवसन तत्र श्रीपुरुषोत्तम परमसुन्दर इति भगवान् श्रीनाथस्य माहात्म्य गृहीत्वा म्वकीयया श्रापयामास श्रीगोपीनाथाचार्या स्वपुत्रस्य बाल्य एव भगवल्लाभप्रसङ्ग विलोक्य सतुष्टाऽपि लोकरीतिमनुसृत्य खिन्ना कतिपयमासं तत्रैवावसन ततश्च ते सपरिवार जगन्नाथक्षेत्रं गताम्तत्रैव भगवल्लीलायां समाविश अभवन

एवमल्पेनैव कालेन श्रीमद्वल्लभाचार्यचरणाना ज्येष्ठपुत्रान् श्रीगोपीनाथाचार्यान वैकुण्ठवासिनो विलोक्य सर्व वैष्णवा खिन्ना अपि श्रीमदाचार्याणां द्वितीयपुत्र श्रीविट्ठलेश्वर पीठाधीश्वर चक्रु

धावका ! यथा हि प्रौढप्रतापशालिन श्रीमदाचार्यमहाप्रभुचरणा अस्य पुष्टिमार्गस्य प्रवर्तका अभवस्तथैव तस्य पोषका अपि एते विट्ठलेश्वरदीक्षिता एव यदि श्रीमदाचार्यचरणेभ्योऽनन्तर श्रीविट्ठलेश्वरदीक्षिता नाभविष्यन्तदाऽयं पुष्टिमार्गो दृढसमारोपितमूलोऽपि नैतावती वृद्धिमलप्स्यत तस्मात्तथा श्रीमद्वल्लभाचार्याणां चरित श्रुतमस्माभि तथैवैतेषामपीति तत्कथामपि सविस्तरं निरूपयामि

जगदीशस्य नियोगेन श्रीगोपीनाथाचार्येषु वैकुण्ठगतेषु सत्सु तदीया कनिष्ठबन्धव श्रीविट्ठलेश्वरा पीठाधीश्वरा अभवन्निति पूर्वमेव निवेदित तस्मिन् समये श्रीगोपीनाथाचार्याणा पत्नी केनापि कारणेन दूषितमानसाऽकलहायत कलहायमाना च सा प्रथमभाण्डार तथा द्रव्यसग्रह च स्वायत्तमकरोत् अत्युदारा श्रीमद्विट्ठलेश्वरा यत्किंचिदपि प्रतापमनावरन्त सर्वमेव नूतनमकार्षु अचिरादेव तेषा तप प्रभावेण तथा श्रीनाथमेवामाहात्म्येन समाकृष्टा वैष्णवा प्रतिदिनमगणितास्तत्सेवार्थमागच्छन तेन तेषामैश्वर्यं परमवर्धत

श्रीविट्ठलेश्वरदीक्षिताश्च गृहकलह शान्तयन्तरमेवेत्य प्रथम श्रीनाथसे-
वाविधि पुनर्व्यवस्थापयामासु ये च तु श्रीनाथपाकशालाया श्रीम
न्माधवचरणपरायणा श्रीवल्लभदीक्षिता स्थापितास्ते च लौकिकीं
बुद्धिमनुसृत्य श्रीनाथसेवाया तथा सावधाना नाऽस्यन्त ताश्च
पुन पुन प्रबोधितापि अनवहितानवलोक्य श्रीविट्ठलेश्वरदीक्षितास्तान्
श्रीनाथसेवातो दूरीकृत्य भगवत श्रीनाथस्याज्ञया तत्स्थाने गुर्जर-
ब्राह्मणान् स्थापयामासु तेऽपि नितरां एव भगवद्भक्तिपरा महता
प्रेम्णा श्रीनाथसेवा चक्रु

एव व्यवस्थाप्य श्रीविट्ठलेश्वरदीक्षिता स्वय श्रीनाथसेवाव्ययमपि
व्यवस्थापयन प्रतिवर्ष लक्षमुद्राव्यय श्रीनाथसेवार्थं नियमित
आसीत् तथैव सर्वेऽपि उत्तमा श्रीभगवत आज्ञामनुसृत्य निय
मिता तत भाविकजनानामतीव सतोष समभवत् प्रतिदिन श्रीम
थुराविवासिगोपालेभ्य एव दधिभाण्डमानीयाऽऽत्मनमपि दुग्ध-
स्यापि श्रीनाथमन्दिर एव स्थापितानां गोरक्षाणां भगवता भोगार्थं
स्थापयामासु

एव सवत श्रीनाथस्य सेवासामञ्जस्यार्थं प्रयतमानेषु श्रीविट्ठले
श्वरदीक्षितेषु एकदा भगवतो भोगार्थं स्थापितेषु दधिभाण्डेषु गोपा-
लानीत दधिभाण्ड त किमपि गोपचिह्नमपश्यन तत विस्मितास्ते
मत्वा पारम्पारागत यत्र रात्रावन्नाभावमाश्रित्य नगर ? ... आरभ्य
ग्रामपुरवासिगोपालानीत दधि भगवता भोग न स्थापनीयमिति
द्वितीय दिन तदाज्ञामङ्गीकृत्य तदर तदनुष्ठित भगवान भक्तव
त्सल श्रीनाथो स्वय प्रतिदिनमिव तस्मिन् दिने न स्वीचकार भोग
विषयान तदवलोक्य दुःखाकुला श्रीविट्ठलेश्वरदीक्षितास्तत्कारण

निरूपयन्तोऽपि तदल्पतया महिम्ना भगवन्तमस्तुवन् श्रीनवनीत श्रीनाथ स्वयं प्रकटीभूय गोपालानीतस्य दधिभाण्डस्य लागनेन तत्क्षणमेवानाययन् श्रीविट्ठलेश्वरदीक्षिताश्च भगवतः श्रीनाथस्य स्वभक्तेषु प्रेमातिशयं वीक्ष्य साश्रया सानन्दा पुनरपि तस्य दधिभाण्डस्य स्थापनाय त पाकशालाध्यक्षमादिशन्

इत्थं सर्वं व्यवस्थाप्य श्रीविट्ठलेश्वरदीक्षिता स्वाभिमतपुष्टिमार्गस्य पोषार्थं ग्रन्थनिर्मिति विधातु मतिमकुर्वन् यद्यपि श्रीमदाचार्यचरणैरणुभाष्यादिक ग्रन्थरत्नराशिं निधाय परमात्मसमत पुष्टिमार्ग समर्थित एव तथापि तत्र केवल स्वमतमेव प्रदर्शित न खलु तेषां तेषामन्यदर्शनकाराणा मतानि खण्डितानि प्रकृत्यैव भगवच्चरणाराधनतत्परा श्रीमदाचार्यचरणा तत एव तै स्वग्रन्थे बाहुल्येन परमत न खण्डितम् तदिदं तेषामशक्तिमूलक भावयन्तोऽन्ये वावदूका अस्य पुष्टिमार्गस्य कल्पद्रुमकल्पस्य खण्डनार्थं प्रायतन्त

तदेतत्सर्वमवलोक्य श्रीविट्ठलेश्वरदीक्षिता परमतखण्डनप्रधान विद्वन्मण्डनाख्य ग्रन्थमरचयन् तस्य च विद्वन्मण्डनमिति नाम स्थापयता श्रीविट्ठलेश्वरदीक्षितानामयमभिप्रायो यत् परमतखण्डन हि विदुषामेव शोभते न पुनर्भगवद्भक्तानां भगवद्भक्तास्तु सदैव परमात्मभक्तावेव निमग्ना न किमपीद रागद्वेषमूलक कर्म कुर्वन्ति विद्वासस्तु खण्डनमण्डनप्रधानव्यवसाया स्वव्यवसाय सम्यक् कुर्वन्तीति अस्मिन् परमतनिराकरणपरे ग्रन्थे प्रादुर्भूते सति अन्यमतानुवर्तिभि साधारणमतिभि कापुरुषैरुत्प्रेक्षिता पुष्टिमार्गदोषा प्रभाते तमोराशय इव क्षणादनश्यन् पण्डितवर्गोऽपि त ग्रन्थमवलोक्य पुष्टिमार्गतत्त्वाना जिज्ञासामारभत एवमन्येऽपि ये जना केवलमिम मार्ग

ारागणिर्वे श्रद्धामूलमसमन्यन्त तेऽपि युक्त्यादिप्रमाणोपष्टम्भमिम मय समयगोचय मृषा अभयन अन्ये च स्मतरगण्डनादृतल. ापमसभ्रम

गयम्रश्च सर्वेऽन्यमतानुयायिन इम पुष्टिमार्ग यत्यत्तर खण्ड-यितुमन्यमुपन्न इत्यमुद्घोषयन–अय माग पनापि भगवत्कृपा प्रचारित तस्य न जगद्गुरुत्व, नापि सर्वलोकमान्यत्व, तेन तस्य निरावरणऽस्माभिन प्रयन्तन इति तमिम तथा दुरापद्भूत्य वृथा नेपारोप निगम्य सर्वे पुष्टिमार्गानुयायिन परं क्षुब्धा अस्य दोषा मासस्य परिहाराय प्रायतन्त त च सर्वे मिलित्वा श्रीविट्ठलेश्वरदी-क्षितान गोस्वामीति बिरुद धारयितु विज्ञापयामासु प्रकृत्यथ सर-लास्ते श्रीविट्ठलेश्वरदीक्षिता स्मा तथा नित्तनिमारण्य विस्मितास्त माम स्वयतु मानवधयन परन्तु तेषामत्याग्रहात्तेऽपि विरुद धारया मासु यावचा ? तद्दिनमारभ्य तद्वंश्य गोस्वामीति विरुद सर्वेऽपि पुष्टिमार्गपीठाधीश्वरा धारयन्ति

एवरीत्या निराकृतषु अन्यदुमतानुयायिदूषणाभासेषु पुष्टिमाग पन्यवृक्षो निष्प्रतिबन्ध वृध प्रवृद्धश्चागणितान् सज्जनान सुखयति स्म श्रीविट्ठलेश्वरदीक्षिताश्च श्रीनाथस्य सेवा तथा चनुयथा भगवान् वासुदेव मन्तुष्टस्ताननुजग्राह

एकदा श्रीविट्ठलदीक्षितेषु स्वगृहवासिषु सत्सु महति प्रभात भग वान स्वयमेवागत्य श्रीनाथ श्रीविट्ठलदीक्षिताना भक्ति परीक्षितुमि च्छुरत्राजगाम तमागतमवलोक्य हर्षातिरेकेण मूर्च्छित इव परम भागवतास्ते विट्ठलदीक्षितास्तत्परमभाग्यान्यतमस्य हरिचरणारविन्द सपूज्य मवस्व नीराजनादिना विनाय सम्यागत्य रक्षु तत्र ,

स्यस्य पुरान् सुपाश्च वनिगणानुमवयया तत्रैका सुगन्धस्ना सिक्ताया मुक्तालङ्कार स्थापयित्वा समागच्छत् तमवेक्ष्य श्रीविट्ठलनाथा मुक्तामलङ्कार भगवते समर्पणाय नगदु इम च आविष्टैश्वर्याभिताना भक्तिविशेष वीक्ष्य सन्तुष्ट श्रीनाथस्तान् प्रत्यवन् भक्तश्रेष्ठ ! त्वया न मे सत्स्व दत्त किन्तु अहमेव त्वया दत्त त्वया चानन भक्त्यतिरेकेण श्रीमदाचार्यचरणा सन्तोषिता विस्तीर्णत च तदीय यशोमण्डल धन्योऽसि वत्स ! अस्मिन् मृत्युलोके मा विस्मृत्य रात्रिन्दिव धनतृष्णापरायणा पामरा जना धन सपादयन्ति न ते सत्य किमपि सपादयन्ति किन्तु धनाभास यत्र तु सर्वा विषयतृष्णा त्वस्त्वाऽहमेवानितस्तेनैव सर्वमर्जितमिति मन्ये दुर्लभा इह जगतीतले त्वादृशा नरपुगवा यावच्चन्द्रसूर्यौ दिवि तिष्ठतस्तावद् पुष्टिमार्ग सम त्वदीयेन यशसा प्रवर्तेतेति तुभ्यमाशीर्वचन ददामीति एवमनुगृह्य श्रीनाथ पुनरपि गिरिराज प्रति प्रचचाल

पाठका ! भगवद्भक्ताना पश्यत सामर्थ्य यै स्वप्रेमातिशयेन त्रैलोक्यनाथोऽपि स्वाधीन कृत धन्यास्ते भक्तमुकुटमणयो, धन्य स भक्तिमार्गो यत्रैतादृशानि रत्नान्यभवन् अस्तु

एव सर्व व्यवस्थाप्य श्रीनाथसेवा व्यवस्थापयितुमिच्छवस्ते विचारयामासु यतस्तेषा सप्त पुत्रा आसन ते च परस्पर कलह विधाय कदाचित्परमात्मसेवा लक्ष्यन्तीति मन्वाना श्रीविट्ठलदीक्षितपादास्तान् सर्वानपि श्रीगिरिराजधारिण श्रीनाथस्य पुरतो निधाय त विज्ञापयामासु भगवन ! अचिन्त्यशक्तिस्त्व त्वदीयामिच्छा को वा ज्ञातु शक्नुयात् तन्ममैतेषु सर्वेष्वपि पुत्रेषु कस्ते रोचत इति वद स एव त्वा सेविष्यते यस्तुभ्य रोचत इति एवनिशम्य स त्रैलो

नाथ येयत गिरिधरायमेव स्वामिमतत्वेन मन्यामास
याम्र जगाद भवद्भिर्मदीयान्यन्यानि स्वरूपाणि स्थाने स्थाने स्थाप
त्वा भक्तिमार्गवृद्धिः कर्तव्या समय समये च मदीयसेवाऽपि
र्तव्या अनेन भक्तिमार्गोऽपि दर्पेण सर्वेषा जनाना कल्याणमपि
र्गन्ति

तच भगवतैव विदिता स्वयस्थानमवलोक्य सन्तुष्टा श्रीविट्ठलेश्वर
न्मार्गीयमात्रा चक्रु

एकदा श्रीविट्ठलेश्वरपादा श्रीद्वारकानाथ साक्षात्कर्तु स्वनिवासा-
न्निर्गता मार्गे परमरमणीय मेवाडनाम्नि राजस्थानान्तर्गते देशे कानि
चिद्दिनानि तस्थु तत्र सिंहाडानामक रमणीय स्थलमवलोक्य परम
सन्तुष्टा श्रीविट्ठलेश्वरैश्चिन्तिता श्रीमद्द्वारकानाथेन अस्मिन् स्थले
श्रीनाथ कतिपयवर्षानन्तर स्वयमागत्य निवसेत् किन्तु यावदहं
जीवामि तावद्भगवान् गिरिराज न मुचद्वति निश्चितमिति तेऽपि
तदित्थमद्भुत वृत्तमाकर्ण्य विस्मितास्तूष्णीं तस्थु सकललोकविख्या-
तान् श्रीविट्ठलदीक्षितचरणास्तत्र समागतान् कर्णाकर्णिकया निशम्य
तत्रत्यो मेवाडाधिपतिमहाराज उदयसिंह स्वयमागत्य कृताभिव
न्दन गत सुवर्णमुद्राणा तथा सुसम्पन्ननागरिक ग्राम चोपायनीचक्र
श्रीविट्ठलेश्वरचरणा अपि त भगवद्भक्त सज्जनाश्रयतत्पर क्षत्रियश्रेष्ठ
मवलोक्य विलोक्य सन्तुष्टा भगवत्प्रसादानन्तर तमन्वगृह्णन
प्रणम्य स्वावास गत तस्मिन् रात्रौ तदीया पत्नी मम स्वकन्यया
श्रीविट्ठलेश्वरान्समेता द्वारकानाथमाययौ सा च कन्या निसर्गत एव
भगवदनुरागशालिनी नाट्यकलाविशारदा शालिनी भगवद्भक्त वाक्य
सामान्य नमेन गुरु नियातु कृतनिश्चया जगाद भगवन् ! अहमस्मि

अनाथा कथमपि दुस्तरे संसारसागरे निपतिता अहं चास्माद् ।
त्राणवानिर्गन्तुकामा त्रैलोक्यनाथं श्रीनाथं शरणीकर्तुमिच्छामि
परन्तु तत्रापि कस्यापि गुरो साहाय्यस्यापेक्षा तन्मे भगवच्चरणार
विन्ददर्शनार्थं सहायो भव इति

परमोदारा श्रीविट्ठलेश्वरदीक्षितास्तस्या राजकन्याया इदं सरल
भाषणं निशम्य सन्तुष्टास्तां भगवद्भक्तिं समग्रामुपदिदिशुः साऽपि
राजकन्या तावतैव कृतकृत्या तां भक्तिरीतिमुपास्यमानाऽस्मे गन्तुं
प्रस्थितांस्तान् गोस्वामिचरणानवलोक्य सगद्गदमवदत् इतः परं सद्गु-
रुदर्शनं मे दुर्लभं भविष्यतीति गोस्वामिचरणाश्च तदुक्तिमाक-
र्ण्याऽपि गंभीराः सस्नेहमवदन्-वत्से ! अस्माकमेवात्रावस्थानं दुर्लभं
भगवानेव प्रतिदिनं गिरिराजादत्रागत्य तुभ्यमात्मानं दर्शयेदिति

इत्थं निगद्य द्वारकाक्षेत्रं प्रयातेषु श्रीविट्ठलनाथगोस्वामिचरणेषु
भक्तवश परमात्मा गिरिराजधारी श्रीनाथः प्रतिदिनं तत आगत्य
तस्या राजकन्याया मन्दिरे क्रीडन्ता समतोषयत् एवं प्रयातेषु केषु
चिन्मासेषु सा राजकन्या भगवतो गमनागमनक्लेशेन स्वनिमित्तमध-
गत्य दूयमाना श्रीनाथं जगाद भगवन् ! मदर्थमत्र प्रतिदि-
नमागच्छतस्तत्रभवता क्लेशो भवति नितरामिति गिरिराजगुल्मलतया-
ऽत्र च नियमेऽपि स्वतन्त्रस्य भगवतस्तथापि न किमपि अशक्य-
मिति श्रीनाथोऽपि तस्या राजकन्याया इदमनुरागमयं भाषणं समा-
कर्ण्य मुस्मितं प्रत्युवाच यद्यपि त्वदीया भक्तिमाधुरी कथामत्रैव स्थातुं
निरुन्धानि तथापि अस्मिन् भूतले यावद्विट्ठलदीक्षिता विराजन्ते
तावदहं गिरिराजादत्र क्वचिदपि गन्तुं न पारयामि यथा हि
यावद्विट्ठलदीक्षिता मम प्रिया न तथा कापि तस्मात्तेषु सर्वं तत्समा
गत्य अहमत्रागत्य निवत्स्यामीति

इद च भगवत श्रीनाथस्य स्वगुरुचरणेषु प्रेम वीक्ष्य सन्तुष्ट मा राजकन्या तूष्णीं तस्थौ

एव सर्व श्रीनाथसेवाविधि व्यवस्थाप्य तथा शास्त्रप्रक्रियामपि नूतनग्रन्थविधानेन निर्दोषा सपाद्य कृतकृत्या अगणिततीर्थयात्राविधानेन लब्धपुण्यसचया श्रीगोस्वामिपदभूषणा श्रीविट्ठलनाथदीक्षिता उचिते काले स्वावतार समापयित्वा भगवदन्तिकमगच्छन तदानी मपि सर्वेषा पुष्टिमार्गानुयायिना वैष्णवजनाना श्रीमदाचार्यचरणवि योगजन्यमिव महादु खमभवत् तथापि तत्सर्वमपि विहाय त दृढ मतयस्तत्पुत्र गिरिधरराजमेव पुष्टिमार्गपीठाधीश्वर चक्रु अन्ये च सर्व तद्गुरु परमोत्साह एकमत्येनावर्तन्त

वाचका ! यथा हि श्रीमदाचार्यमहाप्रभुचरणै स्वयमवतीर्या स्मिन् मर्त्यलोके कल्पान्त स्थायकामेन पुष्टिमार्ग स्थापितस्तथैव श्रीमद्विट्ठलनाथचरणै स्वयमवतीर्येव प्रसारित इति तदीयमपि चरित [illegible]

(४)

[illegible]

बाबरनामा यवनो यदाऽऽगत्य दिल्लीश्वरोऽभवत्तदा सोऽनशिष्टान् सर्वानपि महम्मदीयानामशेपानस्त्रोत यदा च श्रीमदाचार्यचरणा इमा भारतभुव समलञ्चक्रुस्तदा मोंगलकुलसंभव सुप्रसिद्धस्य अकबरस्य पुत्रो जहांगीरनामा दिल्लीश्वर आसीत् पश्चाच्च तदीयो ज्येष्ठ पुत्र शाहजहानो दिल्लीश्वरोऽभूत

अस्मिन् यवनपतौ भारत शासति सति स्थाने स्थाने विद्यमाना अपि यवनराजा अतिदुर्बला न त पीडयितुमशक्नन् तेन प्रजाना साधारणत स्वास्थ्यमेवासीत् अयं च रजपूतक्षत्रियकन्याजन्यत्वेन यादृशा आसन्नपि नासन् तेन सनातनधर्मपीडाऽपि नाभवत् एव गच्छति काले यदाऽय वृद्धो बभूव तदा तदीयाश्चत्वार पुत्रा राज्यार्थं कलहायमाना दुर्निवार्या अभवन तेषु सर्वेष्वपि यवीयान् अवरङ्गजेबनामा पुत्रोऽतिक्रूरमति सनातनधर्मद्वेषपर एव स च क्रमेण सर्वान भ्रातॄन् [illegible] यथाळय प्रघयित्वा पितर च कारागृहवासिन विधाय स्वय दिल्लीश्वरोऽभूत स दिल्लीपतिसिंहासनमधिरुह्य प्रथमत [illegible]नामशेषान्विधाय तत स्वधर्मस्य वृद्धयर्थ सनातनधर्म पीडयितुमारभत यावता 'यद्यपि कस्यापि धर्मस्य वृद्धिरन्यस्य कस्यापि धर्मस्य नाशेन न भवति यत सर्वे [illegible] कस्याऽपि [illegible] महाधर्मस्य [illegible] एव [illegible] [illegible] तथापि [illegible] सर्वेषां [illegible] [illegible] [illegible] [illegible] तथा सति उभयोरपि धर्मयोर्हानि [illegible] [illegible] [illegible] [illegible] [illegible]

यदा चाय क्रूरो दिल्लीश्वर स्वशक्त्या म्यारिमितानि च नामघेया
न्यकरोत्तदाऽस्य सनातनधर्मस्य नाशार्थं मतिं चक्रे इति उपरिष्टात्
वेदितमेव स हि मेने यावत्कालमिमे सनातनधर्मानुयायिन स्वध
र्ममेवोपासमाना अस्माभिर्निता अपि जीवन्ति तावत्कालमस्माक
राज्य न निराबाध यत इमे सर्वेऽपि मूर्तिपूजका अस्मान्विलासदुर-
लानवलोक्य कदाचित् सभूयोत्थाय स्वराज्य स्थापयेयु तस्मात्केन
केनापि प्रकारेण ते सनातनधर्म प्रति वीतानुरागा करणीया इति
विचिन्त्य चैव स दुरात्मा यवनराज सनातनधर्मानुयायिन प्रति
राजधर्मास्वीकारदोषेण द्रव्यदण्डेनायोजयत् ते च प्रथमत एव
नानाविधै क्रूरैर्दण्डैर्व्याकुला अपि प्राणप्रियस्य स्वधर्मस्य त्यागात्
परिमित वित्तत्यागमेव स्वीचक्रु दिल्लीश्वरश्च तेन प्रतिवर्षमपार द्रव्य
राशिमलभत

एव कृत्वाऽपि यदा सनातनधर्मस्य हानिं स नापश्यत्तदा स
स्थाने स्थाने विद्यमानानि सनातनधर्मस्य रक्षकाणि तीर्थस्थानानि
दूषयितु प्रायतत न केवलमेतावदेव किंतु सुप्रसिद्धान् देवालयान
भूमिसात्कृत्वा तत्रस्थदेवप्रतिमा अपि नाशयितुमारभत सनातनध-
र्मस्याधारभूता इव ये खलु विद्वांस आसस्तान स बलादेव समा
नीय स्वधर्मानुयायिनो व्यधात् तत्कार्नीं चागणिता जना स्वधर्मत्या-
गमपेक्ष्य मरणमेवाङ्गीचक्रु

एव मदोन्मत्त त दिल्लीश्वरमवलोक्य श्रीनाथ स्वयमचिन्तयत्
मया हि श्रीविट्ठलदीक्षिताना पश्चान्मेवाडवासार्थं निश्चय कृत
परमभक्तिशालिनी मेवाडाधिपतिकन्याऽपि प्रतिदिन तत्रागन्तु प्रार्थ
यते अहमपि तत्र गन्तुमुत्सुक एव परन्तु अस्मिन्गिरिराजे श्रीम

दाचार्यचरणैरह सशाल पीठे स्थापित इति नाहमेवान्यत्र गन्तु प्रभ-
वामि तदन्य कश्चन पापिन मदीयपीठच्छेदनाय प्रेरयामि येनाह
तत्र गन्तु प्रभवेयमिति विचिन्त्य चैव तमेव क्रूरकर्माण दिल्लीश्वर
निभृत प्रैरयत् सोऽपि तत्प्रेरणामादाय त्वरितमेव तत्सकलसनातन
धर्मानुयायिभिरादृत गिरिराजगत पीठ नाशयितु मतिमकरोत

यावत्का दुर्जना स्वकार्याणि निष्प्रतिबन्ध सिद्धान्यवलोक्य
स्मयमाना आत्मानमेव धन्य मन्यन्ते परन्तु न ते जानन्ति स्वस्य
दुरितसञ्चय क्रमेण परिपाकाभिमुखीभवति यथा हि बाह्यतो
नीरोगी दृश्यमानोऽपि मानवो राजयक्ष्मणाऽन्त स्ववशीकृत केवल
मज्ञजनान मोहयति तथैवेमे दुर्जना अन्यायसपादितैर्धनातिशयेन
मूढानेव मोहयन्ति न विदुष यतस्ते सम्यग्जानन्ति यदेतेऽध प
तनशीला इति तस्मात् केनापि शुभाकाङ्क्षिणा मानवेन स्वप्नेऽपीद
न करणीय यदन्यायेनैश्वर्य वर्धत इति अस्तु प्रकृतमनुसराम

अचिरादेव स दुरात्मा दिल्लीश्वर समस्तवाराणसीप्रभृतितीर्थवृन्द
दूषयन्नपार पापराशिमर्जयन गिरिराजमपि दूषयितुकाम श्रीनाथ
सेवकाना पुष्टिमार्गाध्यक्षाणा समीपे दूत प्रैषयन तदानीं च पीठा
धीश्वरा श्रीगिरिधरलालजीचरणानामात्मजा श्रीदाऊजीपादा आसन्
परन्तु तेषा बालतया सर्वमपि व्यवहार तदीया पितृव्यचरणा एवा
पश्यन स तु सेवकानीतो दूतस्तानवदत् प्रतापशाली दिल्लीपतिर्युष्मा
नाज्ञापयति यद्यस्ति कश्चन विशेषो युष्मासु वा युष्मद्देवताया वा
तदा स शीघ्रमेव दर्शनीय अथवा राजधर्मो वा स्वीकरणीय इत
रथा गतिर्नास्ति यदि मदीयराज्ये यूय स्थातुमिच्छत तदा मदीयध
र्मेस्वीकार आवश्यक इति

इदं च तदुग्र दूतस्य भाषणं निशम्य सर्वे चिन्तामग्ना अभवन् तदा गिरिकन्दरणा सहसा यथाविधि श्रीनाथं पूजयित्वा विशेषं शंखनादमकार्षीत् परन्तु अतर्क्यप्रभावशाली श्रीनाथस्तां न ददौ तेन सोऽपि परं निराशो अभवत् एवं मन्त्रेषु सर्वेषु शुष्येषु धीमता शाङ्गजीवरणा मथानवदन् दिलीपादिरपि भगवन्तैव निहितो भगवद्दासो कथमतिक्राम्येत् तदधुना सर्वैरपि भयङ्किभिर्ना विहाय मान्यकार्याणि करणीयानि सायङ्काले भगवान् स्वयमेव वर्तव्यं बोधयेदिति

तदिदं तथा प्रतिवचनमाकर्ण्य सर्वे वैष्णवास्तूष्णीमतिष्ठन् सर्वेऽपि भगवतोऽपि प्रत्युत्तरापेक्षी तत्रैव तस्थौ

अथ दिल्लीशस्य सुहृत इव मन्दीभवति सूर्यपरितापे, परित इव न शक्यतेऽन्यत्र गच्छति पक्षिवृन्दे, शक्यभाषणता इव कालाग्निरिव विपति सूर्य नौ शौ पश्चिमे सीधरागे निमग्न न [illegible] तत्र समागमभीता इव [illegible]

[illegible]

स्म भगवान् मेवाडदेश प्रति गमिष्यति स च स्वयमेव स्वविशेष प्रदर्शयन्त मूढ दिल्लीश्वर विस्मित करिष्यतीति उक्त्वा चैत्य ते पुनरपि श्रीनाथसेवार्थं शयनमन्दिरमाजग्मु

प्रभाते च ते पितृव्यचरणा सर्वेभ्यस्तदपूर्व वृत्त कथयामासु सर्वे च मथुरावासिनस्तन्निशम्य पर दु खाकुला स्वयमपि तेनैव सम मेवाडदेश गन्तु निरचिन्वन् अथ समाप्ते राजभोगोत्सवे सर्वे महाप्रभुवशजा सम पुष्टिमार्गपीठाधीश्वरेण श्रीनाथ प्रस्थातु विज्ञापयामासु परन्तु यावत्काल सर्वे व्रजवासिनो गोपाला समागत्य नात्रोपस्थातव्य स प्रभुर्न चचाल तत्र रथमारुह्य तस्य दिल्लीश्वरस्य निवासस्थान आमानामक नगरमेमिलदश्वाश्चोदयितु स सारथिमवदत् तदाज्ञामनुसृत्य सर्वे वैष्णवास्तथा गोपाला रथमितो वर्तमाना प्रातिष्ठन्त रथस्य पुरतस्तु वासुमहादेवनामा वृद्ध सेवक करदीपिका गृहीत्वा प्रचचार

अचिरादेव निविड नगरस्थित स्वमन्दिर श्रीनाथ सुखेन समागमाम [illegible] द्वारपालेषु समपि अनायासेन अन्त प्रविश्य सवानपि अन्त प्रावेशयत्

तत्र नियमभ्रष्टो श्रीनाथ स्वयमेव दिल्लीश्वरस्य पुरत प्रादुर्भूय कोपेन [illegible] मत्कृपया त्व भारतवर्षस्य राज्य लब्ध्वा माममानयसि [illegible] मद्भक्तान् पीडयसि ? [illegible] यद्यत्र [illegible] भविष्यसीति स तु पाप [illegible] [illegible] श्रीनाथस्य [illegible] तत श्रीनाथा- [illegible] तत्र स्थान [illegible] [illegible] सर्वेऽपि वैष्णवा [illegible] अथ समाप्ते [illegible]

होत्सवे भगवान् श्रीनाथोऽग्रे गन्तु सर्वानादिशत् ततश्च सर्व ते प्रवसन्तो 'दड्डोतीघाट'नामक स्थल प्रापु तत्र च सेवादिक निर्वि सर्व स्वीकृत्याग्रे प्रचलितो भगवान् चमण्वत्यास्तीर स्वनिवासमक स्पयत् तदानीं च कश्चन यवनाधिकारी सम यवनसैन्येन तत्र समुपस्थित श्रीगोवर्धननाथ निशम्य द्वेषेणानुदधाव अनुधावतस्तान् यवनानवलोक्य सर्वे वैष्णवा सचिन्ता अजायन्त भगवान् दीन वत्सल श्रीनाथस्तान् सर्वानपि आश्वास्य तान् यवनांस्तथाऽमोहयत् यथा ते सर्वेऽपि किंदिशीका अभवन् प्रालपंश्च परस्पर नात्रास्ति कश्चन दैव किंतु घोर पर्वतो भयङ्करै सिंहैरावृत इति

एवरीत्या सर्वान् विघ्नान्निराकृत्य भगवान् श्रीनाथ परमशूरजन रक्षितस्य धर्मावासभूतस्य राजस्थानस्य सीमा प्राप त च समागत मवलोक्य बुन्दीनरेश परमधार्मिको महताऽऽनन्देन प्रत्युज्जगाम सादरमसेवत च प्रार्थयत चात्रैव स्थातु तथापि श्रीनाथो मेवाड-देश गन्तु कृतनिश्चयस्तत्र स्वप्रतिमा स्थापयितुमन्वमोदत ततश्च जोधपुरनगर समागत्य तत्रत्येन राज्ञा कृत स्वागत स्वीकृत्य पुष्कर राजतीर्थ स्नात्वा कृष्णगढनगर जगाम ततश्च निर्गत 'चापसेनी' ग्राममगाययौ तत्र चतुर्मासपर्यन्त स्थित्वा महता मोदेन कालमनयत्

तत्र स्थित श्रीनाथमवलोक्य पितृव्यपादा श्रीगोविन्ददीक्षिताः सत्वर मेवाडाधिपतयनराभूमवता राजसिंहस्य समीपमागत्य श्रीना-थागमन तस्मै न्यवेदयामासु सोऽपि तन्निदेशादपर वृत्तमाकर्ण्य पर सन्तुष्ट स्वर्ग हस्तगतमिव मन्यमान सादरं प्रत्युद्गम्य प्रणम्य परमपवित्र श्रीनाथस्य चरणारविन्द प्रार्थयामास भगवन् ! इय हि सदा मेवाडमेदिनी तथाऽपि इद सर्वमपीद भगवत एव तदत्र

रोचते तत्रैव भगवता स्थातव्य यावदह जीवामि यावच मदीया वशजा जीविष्यन्ति तावत्युष्मत्सेवाया कदापि न्यून न भविष्यतीति विज्ञाप्य धैर्य सर्वानपि श्रीदाऊजीमहाराजप्रमुखान महाभागवतान् समतोषयामास

अथ तस्माद्ग्रामाभिगत श्रीनाथ क्रमेण मेवाडदेश प्रविश्यान्तर्मार्गे च्छमकस्मात्स्थापि विशालस्य वटवृक्षस्याधस्तात् स्वरथ स्थापयामास श्रीनाथस्य च रथ तत्रैव स्थितमवलोक्य विस्मिता यदा कारणमनिज्ञासन्त तदाऽत्रैव मा राजकन्याऽवसच्चेनाहमत्रैव वत्स्यामीति जगाद निशम्य चैमा भगवदाज्ञा पितृचरणा श्रीगोविन्ददीक्षिता सत्वर सवानाहूय श्रीनाथस्य मन्दिरं निमातुमाज्ञापयन मेवाडाधिपतिरपि सवसामग्रीसमेतस्तन्मन्दिर विधातु परमसाहाय्ययन् अचिरादेव परमविशाल श्रीनाथस्य मन्दिर सम्पन्नमभवत् सम्पन्ने च तस्मिन पितृव्यचरणा श्रीगोविन्ददीक्षिता श्रीदामोदरलालमहाराजाना हस्तेन वैदिकविधिमनुसृत्य यथाशास्त्र श्रीनाथ पीठाधिष्ठित चक्र परमधार्मिक सम्मान्या मेवाराधिपता राजसिंहोऽपि भगवन्त त्रैलोक्यनाथ श्रीनाथ स्वराज्यवासिनमवलोक्य स्वजन्म सफल मन श्रीनाथसनाथ बहून ग्रामान दत्त्वा श्रीनाथ च मेवाडवासिन विशाय सत राजस्थानवासिन तत्सम्बन्धा राजान स्वानन्द तदारभ्य वृन्दावननाथ श्रीनाथस्य कृष्णभाक्ता कल्याणस्य [illegible]

[illegible]

स च वचना [illegible] मेवाडाधिपतिना पूर्वमेव [illegible] निवसन्त श्रीनाथमवलोक्य [illegible] [illegible] मेवाडप्रमाणमितु [illegible] ता च [illegible] मेवाडनाथ

(३)

यान्यथा ' एव श्रीनाथ मेवाडदेशे मरुन्धूरजग्रामे निसाव एव दुर्गमपर्वतान्तरिपरिनिष्ठिते प्रतिष्ठाप्य तिथिनाम्ले श्रीमहाप्रभुवल्लभाचार्यशता पुनरपि मयाभिमानु मर्ति रभ्रु प्रथमत श्रीमदाचार्य चरणै सल्लादरपात्रेषु ब्रह्मसूत्रेषु अणुभाष्य विधाय तत्र मरुलार्थांतुवादित्व दर्शित परन्तु पश्चात्केचित्तार्किकैम्मरनाक्षेप कृत इति तन्निराकरणाय श्रीविट्ठलदीक्षितैर्विद्वन्मण्डन कृत तथापि सत्लमता न्यनून्य तेषा खण्डन कनाऽपि न कृतमिति सर्वऽपि जनाम्मादशमय स्थानदयक्ता परमभावयन एवस्थिते मेवाडदेश प्राय लब्धस्थ्येषु सर्वेषु सर्वे वैष्णवगणा श्रीपुरुषोत्तममहाराजात्साद्ग्रामयनिर्णोणार्थं विनापयामासु ते च श्रीविट्ठलदीक्षिताना तृतीयतनुजश्री-बालकृष्णमहाराजानामात्मना पर शास्त्रपारगा परमभागवता श्रीनाथकृपापालिनसान्ध्र मथ विधातु मतिं चनु असिनर्थे साह्यदानाय याचित श्रीनाथस्याद्विज्ञान्न स्वीकृत्य तथास्तुमादिदेश

अचिरादेव सुवर्णसूत्रन्यारया लिखितु श्रीपुरुषोत्तमनीमहाराजा आरभन्त ते च निसगत एव विमलमतयोऽपारशास्त्रज्ञानसभार भासुरा भगवत्कृपापालिनस्तथाऽणुभाष्यस्य टीका लिलिखुर्यथा ता वीक्ष्य सर्वोपि पण्डितजन सुतरा व्यस्मयत अधुनाऽपि तादृशी सकलशास्त्रार्थप्रतिपादिनी टीका सस्कृतवाङ्मयऽन्यया न दृश्यते तत्र च नि पक्षपातन अनुकृतानि विविधवादिना मतान्यवलोक्य साधारणमतिरपि विद्वान श्रीमता श्रीपुरुषोत्तममहाराजाना पाण्डित्ये सजातादरो जायत एव यद्यप्यस्मिन् भाष्ये वार्तिक नास्ति तथापि इमामेव टीका वार्तिकत्वन सभावयामि क खलु अलौकिकप्रज्ञा-विरहितो भगवत्कृपारन्यस्ता द्रष्टुमपि प्रभवेत् दूरे च ता ज्ञातु इव एव तादृशटीकाया विधातु कीदृशी प्रज्ञेति वाचकैरनुमातव्यम्